शून्यमध्य पु० शून्यमाकाशो मध्ये यस्य । १नले राजनि० ।
शून्यवादिन् पु० शून्यमभावमात्रं सर्वकारणतया वदति
वद–णिनि । बौद्धभेदे बुद्धशब्दे ४५८१ पृ० दृश्यम् ।
शून्या स्त्री शून्यमन्तरमस्याः अच् । १नल्यां विश्वः । २महाकरटकिन्याम् । (फणिमनसा) राजनि० । [ईदित् शून्यः
शूर हिंसे स्तम्भे च दि०आ०सक०सेट् । शूर्यते अशूरिष्ट ।
शूर विक्रमे अद० चु० उभ० सक० सेट् । शूरयति ते
अशुशूरत् त ।
शूर पु० शूर–अच् । १वीरे विक्रमवति अमरः । २वसुदेवनामके यादवे मेदि० ३सूर्ये त्रिका० ४अर्कवृक्षे ५सिंहे
६शूकरे पुंस्त्री० स्त्रियां ङीष् । ७चित्रकवृक्षे ८शाले
९निकुचे १०मसूरे च पु० राजनि० ।
शूरण पु० शूर–ल्यु । (ओल) १मूलभेदे अमरः "शूरणो
दीपनो रूक्षः कषायः कण्डुकृत् कटुः । विष्टम्भी
विशदो रुच्यः कफार्शःकृन्तनो लघुः । विशेषादर्शसे
पथ्यः प्लीहगुल्मविनाशनः । सर्वेषां कन्दशाकानां शूरणः
श्रेष्ठ उच्यते । दद्रूणां रक्तपित्तानां कुष्ठानां न हितो
हि सः । सन्धानयोगसंप्राप्तः शूरणो गुणवत्तमः"
भावप्र० । २श्योणाकवृक्षे च शब्दमाला । [च ।
शूरसेन पु० शूरा सेना यत्र, यस्य वा । १देशभेदे २नृपभेदे
शूर्प माने चु०उभ० सक० सेट् । शूर्पयति ते अशुशूर्पत् त ।
शूर्प पु० शूर्प्यते धान्यादिकमनेन शूर्प–घञ् । (कुला) धान्यादिस्फोटके १वंशमयपात्रे २द्रोणद्वयपरिमाणे च शब्दच० ।
शूर्पकर्ण पुंस्त्री० शूर्पे इव कर्णौ यस्य । १गजे त्रिका० ।
स्त्रियां ङीष् । २शूर्पश्रुतिरप्यत्र हारा० ।
शूर्पणखा(खी) स्त्री शूर्पे इव नखा अस्याः णत्वम् वा ङीष् ।
रावणभगिन्यां शब्दमा० । [शब्दच० ।
शूर्पपर्णी स्त्री शूर्पे इव पर्णान्यस्याः ङीप् । शिम्बीभेदे
शूर्पवात पु० ६त० । शूर्पजवायौ फुत्कारे त्रिका० ।
शू(सू)र्म पु० शुष उर्मिरस्त्यस्याः अच् वा पृषो० सस्य शः । लौहप्रतिमायाम् अमरः । [लौहादिप्रतिमायां शब्दच० ।
शू(सू)र्मि(र्मी) स्त्री शुष ऊर्मिः यस्याः वा अत्वम् वा ङीप् ।
शूल रुजायां भ्वा०पर० अक० सेट् । शूलति अशूलीत् ।
शूल पुन० शूल–क । १रोगभेदे २त्रिशूले च अमरः । ३व्यथायां ४मृत्यौ ५सुतीक्ष्णे अयःफाले धरणिः । ६चिह्ने
मेदि० । ७युतिभेदे विष्कम्भादिषु नवमे योगे च पु० ।
८विक्रेतव्ये "अट्टशूला जनपदाः शिवशूलाश्चतुष्पथाः ।
केशशूलाः स्त्रियो राजन् ! भविष्यन्ति युगक्षये" भा०व०
१८८ अ० । अट्टशब्दे ९५पृ० दृश्यम् । शूलरोगभेदे निदानादिकं भावप्र० उक्तं यथा
"अथ शूलाधिकारः । तत्र शूलस्य सन्निकृष्टं निदानमाह "दोषैः पृथक्समस्तामद्वन्द्वैः शूलोऽष्टधा भवेत् ।
सर्वेष्वेतेषु शूलेषु प्रायेण पवनः प्रभुः(कर्त्ता)" । अथ वातिकस्य विप्रकृष्टं निदानं सम्प्राप्तिपूर्वकं लक्षणञ्चाह "व्यायामयानादतिमैथुनाच्च प्रजागराच्छीतजलातिपानात् ।
कलायमुद्गाढककोरदूषादत्यर्थरूक्षाध्यशनाभिघातात् । कषायतिक्तातिविरूढजान्नविरुद्धवल्लूरकशुष्कशाकैः । विट्शुक्रमूत्रानिलसन्निरोधाच्छोकोपवासादतिहास्यभाषात् ।
वायुः प्रवृद्धो जनयेद्धि शूलं हृत्पृष्ठपार्श्वत्रिकवस्तिदेशे ।
जीर्णे प्रदोषे च घनागमे च शीते च कोपं समुपैति
गाढम् । मुहुर्मुहुश्चोपशमप्रकोपौ विण्मूत्रसंस्तम्भनतोदभेदैः । संस्वेदनाभ्यञ्जनमर्दनाद्यैः स्निग्धोष्णभोज्यैश्च
शमं प्रयाति" । व्यायामो मल्लयुद्धादिः यानं तुरगरथादि
मैथुनं स्त्रीसेवा प्रजागरो रात्रौ, एषामतियोगात् शीतजलप्रभूतपानात् कलायस्त्रिपुटः आढकः तुवरी
कोरदूषः कोद्रवः । अतिरूक्षद्रव्यसेवा, अध्यशनं भुक्तस्योपरि भोजनम् अभिघातो लोष्टादिभिः, कषायतिक्तरससेवा विरूढजान्नम् विरूढमङ्कुरितमन्नम् कलायचणकादि तज्जमन्नं भक्ष्यम् । वल्लूरकं शुष्कमांसम् । तस्य
शूलस्य देशमाह हृदादिषु तत्र हृच्छूलस्य पृथगपि
लक्षणं पठन्ति "कफपित्तावरुद्धस्तु मारुतो रसमूर्च्छितः ।
हृदिस्थः कुरुते शूलमुच्छ्वासायासरोधकम् । स हृच्छूल
इति ख्यातो रसमारुतकोपजः" । अथ पार्श्वशूलस्यापि
लक्षणमाह "कफं निगृह्य पवनः सूचीभिरिव निस्तुदन् । पार्श्वस्थः पार्श्वयोः शूलं कुर्यादाध्मानसंयुतम् ।
तेनोच्छ्वसिति वक्त्रेण नरोऽन्नञ्च न काङ्क्षति । निद्राञ्च
नाप्नुयादेव पार्श्वशूलः प्रकीर्त्तितः" । वस्तिशूलस्यापि
लक्षणमाह "संरोधात् कुपितो वायुर्वस्तिं संश्रित्य तिष्ठति । वस्तेरध्वनि नाडीषु ततः शूलोऽस्य जायते ।
विण्मूत्रवातसंरोधी वस्तिशूलः स उच्यते" । प्रकृतमनुसरति जीर्णे भुक्ते प्रदोषे रात्र्यागमे रात्रिभवशीतेन वातप्रकोपात् । घनागमे वर्षासु मेघोदये
च तथैव । पैत्तिकमाह "क्षारातितीक्ष्णोष्णविदाहितैलनिष्पावपिण्याककुलत्थयूषैः । कट्वम्लसौवीरसुराविकारैः क्रोधानलायासरविप्रतापैः । ग्राम्यातियोगादशनैर्विदग्धैः पित्तं प्रकुप्याशु करोति शूलम् । तृण्मोह-